स्तोत्र

संस्कृत क्रं. १७५

# अपराधस्तोत्र

# व

# मुकुंदाष्टक

~~धु~~ ६९८ | स्तो 3

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

श्रीसांब॥ ओंकारबिंदुसंयुक्तं नित्यं ध्यायंति योगिनः॥ का
मदं मोक्षदं चैव ओंकाराय नमो नमः॥१॥ नमंति ऋषयो
देवा नमंति सर्वदेवताः॥ नकारानंदसर्वेश नकाराय नमो
नमः॥२॥ महादेवं महात्मानं महाध्यानपरायणं॥ महापाप
हरं नित्यं मकाराय नमो नमः॥३॥ शिवं शांतं जगन्नाथं लो
कानुग्रहकारकं॥ शिवमेकपरं ब्रह्म शिकाराय नमो नमः
॥४॥ वाहनं वृषभो यस्य वासुकिः कंठभूषणं॥ वामे शक्ति
धरं देवं वकाराय नमो नमः॥५॥ यत्र यत्र स्थितं देवं
सर्वव्यापिनमीश्वरं॥ यो गुरुः सर्वदेवानां यकाराय नमो नमः॥
६॥ षडक्षरमिदं स्तोत्रं यः पठेच्छिवसंनिधौ॥ शिवलोकमवाप्नोति
शिवसायुज्यमाप्नुयात्॥७॥ इति श्रीशिवषडक्षरस्तोत्रं संपूर्णं॥

Joint project of the Vaidika Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2)

श्रीसांब॥ आदौकर्मप्रसंगात्कलयतिकलुषंमातृकुक्षौस्थितं
मांविण्मूत्रामेध्यमध्येक्वथयतिनितरांजाठरोजातवेदाः॥यद्यद्वात
त्रदुःखंव्यथयतिनितरांशक्यतेकेनवक्तुंक्षंतव्योमेपराधःशिवशिवशि
वशिवभोःश्रीमहादेवशंभो॥१॥बाल्येदुःखातिरेकान्मललुलि
तवपुस्तन्यपानेपिपासानोशक्तिश्चेंद्रियेभ्योभवगुणजनिताजंतवो
मांतुदंति॥नानादुःखैरोगादिदुःखद्रुदनपरवशःशंकरंनस्मरामिक्षं
तव्योमे०॥२॥प्रौढोहंयौवनस्थोविषयविषधरैःपंचभिर्ममसंधौ
दष्टोनश्यद्विवेकःसुतधनयुवतिस्वादुसौख्येनिषण्णः॥शैवे
चिंताविहीनंममहृदयमहोमानगर्वाधिरूढंक्षंतव्योमे॥३॥
वार्धक्येचेंद्रियाणांविगतमतिगतिश्चाधिदैवादितापैःपा
पैरोगैर्वियोगैर्विसदृशवपुषंप्रौढिहीनंचदीनं॥मिथ्यामोह

(2A)

भिक्षोषेर्भ्रमतिममनोधूर्जटेध्यानशून्यं क्षंतव्योमे ॥४॥
स्नात्वाप्रत्यूषकालेस्नपनविधिविधौनाहृतंगांगतोयंपूजार्थं
वाकदाचिद्बहुतरगहनात्खंडबिल्वीदलानि॥नानीतापद्ममा
लासरसिविकसितागंधपुष्पेत्वदर्थंक्षंतव्योमे॥५॥दुग्धै
र्मध्वाज्ययुक्तैर्दधिसितसहितैःस्नापितंनैवलिंगंनोलिप्तंचंद
नाद्यैःकनकविरचितैःपूजितंनप्रसूनैः॥धूपैःकर्पूरदीपैर्विवि
धरसयुतैर्नैवभक्ष्योपहारैःक्षंतव्योमे॥६॥नोशक्यंस्मा
र्तकर्मप्रतिपदगहनंप्रत्यवायाकुलाढ्यंश्रौतेवार्ताकथंमेद्वि
जकुलविहितेब्रह्ममार्गेसुसारे॥ज्ञातोधर्मोविचारैःश्रवणम
ननयोःकिंनिदिध्यासितव्यंक्षंतव्योमे॥७॥ध्यात्वाचित्तेशि
वाख्यंप्रचुरतरधनंनैवदत्तंद्विजेभ्योहव्यंवालक्षसंख्यंहुतवह

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3)

वदनेनार्पितंबीजमंत्रैः॥नोतसंगांगतारिव्रतपरिचरणेरुद्र
जाप्यैस्त्वदर्थंक्षंतव्योमे॥८॥स्थित्वास्थानेसरोजेप्रणवमय
मरुत्कुंभकेसूक्ष्ममार्गेशांतेदांतेप्रलीनेप्रकटितगहनेज्योतिरू
पपराख्ये॥लिंगस्थब्रह्मवाक्यैःसकलगततनुंशंकरंनस्मृ
रामिक्षंतव्योमे॥९॥नग्नोनिःसंगशुद्धस्त्रिगुणविरहितो
ध्वस्तमोहांधकारोनासाग्रेन्यस्तदृष्टिर्विजितभवगुणोनैवदृ
ष्टंकदाचित्॥उन्मन्यावस्थयात्वांविगतकलिमलंशंकरंनस्म
रामिक्षंतव्योमे॥१०॥चंद्रोद्भासितशेखरेस्मरहरेगंगाधरे
शंकरेसर्पैर्भूषितकंठकर्णविवरेनेत्रोत्थवैश्वानरे॥दंतित्व
कृतसुंदरांबरधरेत्रैलोक्यसारेहरेमोक्षार्थंकुरुचित्तवृत्ति
मखिलामन्यैस्तुकिंकर्मभिः॥११॥किंयानेनधनेनवाजिक

The Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai Joint Project

(3A)

रिभिः प्राप्तेनराज्येनकिं किंवापुत्रकलत्रमित्रपशुभिर्देहेनगेहे
नकिं ॥ज्ञात्वैतत्क्षणभंगुरंसपदिरेत्याज्यंमनोदूरतः स्वात्मार्थंगुरु
वाक्यतोभजभजश्रीपार्वतीवल्लभं ॥१२॥ आयुर्नश्यतिपश्य
तिप्रतिदिनंयातिक्षयंयौवनंप्रत्यायांतिगताः पुनर्नदिवसाःका
लोजगद्भक्षकः ॥ लक्ष्मीस्तोयतरंगभंगचपलाविद्युच्चलंजीवि
तंतस्मात्त्वांशरणागतंशरणदंत्वंरक्षरक्षाधुना ॥१३॥ वंदेदे
वउमापतिंसुरगुरुंवंदेजगत्कारणंवंदेपन्नगभूषणंमृगधरं
वंदेपशूनांपतिं ॥ वंदेसूर्यशशांकवह्निनयनंवंदेमुकुंदप्रियंवंदे
भक्तजनाश्रयंचवरदंवंदेशिवंशंकरं ॥१४॥ करचरणकृतंवाका
यजंकर्मजंवाश्रवणनयनजंवामानसंवापराधं ॥ विहितमविहितं
वासर्वमेतत्क्षमस्वजयजयकरुणाब्धेश्रीमहादेवशंभो ॥१५॥
आत्मात्वंगिरिजामतिःसहचराःप्राणाःशरीरंगृहंपूजातेविष

(५)

योपभोगरत्नानि ज्ञा[illegible]माधिस्थिति:॥ संचार: पदयो: प्रदक्षि
णविधो स्तोत्राणि सर्वागिरो यद्यत्कर्म करोमि तत्तदखिलं शं
भोतवाराधनम् ॥३६॥ ॥इति श्रीमत्परिव्राजकाचार्य श्री
मच्छंकराचार्यविरचितं अपराधस्तोत्रं संपूर्णम् ॥छ॥ ॥
श्रीराम॥ करारविंदेन पदारविंदं मुखारविंदे विनिवेशयं
तं॥ वटस्य पत्रस्य पुटे शयानं बालं मुकुंदं मनसा स्मरामि॥
१॥ वटस्य पत्रे शयनं मुरारिं च स्नातकाया परिधानकाले॥
कल्यांतकाले शयि रूपदुग्धा बालं मुकुंदं॥२॥ मुकुटं लला
टे चरणे च रत्ने करे च चक्रं अतिशोभियंतं॥ वाद्यं च वेणुं च क
रे मुरारे बालं मुकुंदं॥३॥ कुंदं च पुष्पं भुजगे शयानं कंठे च मा
ला ह्रदि श्रीमे विचित्रं॥ गुंजाभियुक्तं मुकुटे ललाटं बालं मुकुंदं॥
४॥ श्यामं शरीरं जलरूपपूर्णं मयूरपपिछं अतिशोभियंतं॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5A)

दास्यामिगोपीजनवल्लभस्त्वंबालंमुकुंदं ०॥५॥ अर्धंशरीरंन
ररूपदृष्टाअर्धंशरीरंविकरालबालम्॥हिरण्यकेशांत्वचिदार
यंतंबालंमुकुंदं ०॥६॥ यंब्रह्मबालंभुवनैकपालंसंसारमायाऽ
अतिमोहजालं॥यशोविशालंशिशुपालकालंबालंमुकुंदं ०॥
७॥ गोवृंदमध्यंपरिवेष्टयंतंक्रीडंतिगोपालसखाकुरंगं॥गो
पीभजंतंशरणंनमस्तोबालंमुकुंदं ०॥८॥ ध्यायंतियंनित्यप
दारविंदश्रुत्वायशोदास्तनबाललं॥क्रीडंतिवैकुंठगृहं
स्फुरेंद्रंबालंमुकुंदंमनसास्मरामि॥९॥ ॥इतिश्रीमच्छंक
राचार्यविरचितंमुकुंदाष्टकस्तोत्रंसंपूर्णं॥श्रीकृष्णार्पणमस्तु॥
श्रीरामःश्रीयतांममम॥ ॥छ॥श्रीरामचंद्रार्पणमस्तु॥ ॥
शके १७९७ युवनामकार्तिककृष्ण ५ बुधेसमाप्तः॥ ॥छ॥ ॥

the Rajawade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. A joint project of

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com